# मन्त्र पुष्पम्

योऽपां पुष्पं वेद पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

अग्निर्वा अपामायतनम् । आयतनवान् भवति । योग्नेरायतनं वेद । आयतनवान् भवति । आपोवा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति । आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

असौ वै तपन्नपामायतनम् आयतनवान् भवति । योऽमुष्यतपत आयतनं वेद । आयतनवान् भवति । आपो वा अमुष्यतपत आयतनम् ।आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

चन्द्रमा वा अपामायतनम् । आयतनवान् भवति । यः चन्द्रमस आयतनं वेद । आयतनवान् भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

नक्षत्त्राणि वा अपामायतनम् । आयतनवान् भवति । यो नक्षत्त्राणामायतनं वेद । आयतनवान् भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति । आपो वै पर्जन्यस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

संवत्सरो वा अपामायतनम् । आयतनवान् भवति । यः संवत्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवत्सरस्यायतनं वेद । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ।

ॐ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान् काम कामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ।

ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा ।
ओं तद्सत्यम् । ओं तत्सर्वम् । ओं तत्-पुरोर्नमः ॥

अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु
त्वं यज्ञस्त्वं वषट्कारस्त्व-मिन्द्रस्त्वगं
रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः ।
त्वं तदाप आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।

ईशानस्सर्व विद्यानामीश्वर स्सर्वभूतानां
ब्रह्माधिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा शिवोम् ।

तद्विष्णोः परमं पदगं सदा पश्यन्ति
सूरयः दिवीवचक्षु राततं तद्वि प्रासो
विपस्यवो जागृहान् सत्समिन्धते
तद्विष्णोर्य-त्परमं पदम् ।

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ।

Web Url: http://www.vignanam.org/veda/mantra-pushpam-devanagari.html